Manindra Mazumdar Memorial College for Women * Dakshineswar, Kolkata-35 * LIBRARY

Manindra Mazumdar Memorial College for Women * Dakshineswar, Kolkata-35 * LIBRARY

# WEST BENGAL STATE UNIVERSITY

B.A. Honours 2nd Semester Examination, 2020

## SANACOR04T-SANSKRIT (CC4)

Time Allotted: 2 Hours | Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

### SECTION-A

(**Marks:** 20)

1. अधस्तनेषु एकः प्रश्नः समाधेयाः। 10×1 = 10

(क) श्रीमद्भगवद्गीतानुसारम् आत्मनः स्वरूपं वर्णनीयम्।

(ख) गुणत्रयाणां कः श्रेष्ठः ? तस्य उत्कर्षः श्रीमद्भगवद्गीतानुसारेण प्रदर्शनीयः।

2. अधोलिखितेषु पञ्च प्रश्नाः संस्कृतेन देवनागरलिप्या च समाधेयाः। 2×5 = 10

(क) श्रीमद्भगवद्गीतायाः उत्सः कः भवति ?

(ख) 'परतस्तु सः'– तत्पदेन कः बोध्यः ? तस्य स्वरूपं किम् ?

(ग) 'प्रकृतिस्थानि कर्षति'– कथं कानि प्रकृतिस्थानि ? कश्च कर्षति ?

(घ) 'विषयानुपसेवते'– कः कानि आश्रित्य किम् उपसेवते ?

(ङ) 'मे भिन्ना प्रकृतिरष्टधा'– अत्र कस्य प्रकृतिः उक्ता ? प्रकृतेः अष्टौ भेदाः के भवन्ति ?

(च) क्षेत्रं नाम किं भवति ?

(छ) जीवदेहे तमोगुणस्य प्रभावः कीदृशः भवति ?

(ज) महाभूतानि कतिविधानि ? तेषां नामानि उल्लिख्यन्ताम्।

### SECTION-B

(**Marks:** 25)

3. अधोलिखितेषु एकः प्रश्नः समाधेयः – 10×1 = 10

(क) श्रीमद्भगवद्गीतायां वर्णिता ज्ञानयोगस्य प्रशस्तिः वर्णनीया।

(ख) तपसः स्वरूपं निरूप्य भेदः प्रदर्शनीयः।

4. अधस्तनेषु श्लोकेषु त्रयाणां संस्कृतेन देवनागरलिप्या च व्याख्या कार्या। 5×3 = 15

(क) यदि मामप्रतीकारमशस्त्रं शस्त्रपाणयः।
धार्तराष्ट्रा रणे हन्युस्तन्मे क्षेमतरं भवेत्॥

(ख) इन्द्रियाणां हि चरतां यन्मनोऽनुविधीयते।
तदस्य हरति प्रज्ञां वायुर्नावमिवाम्भसि॥

(ग) आवृतं ज्ञानमेतेन ज्ञानिनो नित्यवैरिणा।
कामरूपेण कौन्तेय दुष्पूरेणानलेन च॥

(घ) तस्मादज्ञानसम्भूतं हृत्स्थं ज्ञानासिनात्मनः।
छित्त्वैनं संशयं योगमातिष्ठोत्तिष्ठ भारत॥

(ङ) असंशयं महाबाहो मनो दुर्निग्रहं चलम्।
अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते॥

## SECTION-C

**(Marks: 5)**

5. अधोलिखितेषु एकं विषयमाश्रित्य संस्कृतेन देवनागरलिप्या च टीका लेख्या। 5×1 = 5

(i) श्रीकृष्णः, (ii) कर्मफलम् (iii) भक्तिमान्।

अथवा

अधोलिखितयोरेकस्य व्याख्या सुरगिरा देवनागरलिप्या च करणीया। 5×1 = 5

(क) यत् करोषि यदश्नासि यज्जुहोषि ददासि यत्।
यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम्॥

(ख) अनपेक्षः शुचिर्दक्ष उदासीनो गतव्यथः।
सर्वारम्भपरित्यागी यो मद्भक्तः स मे प्रियः॥

**N.B. :** *Students have to complete submission of their Answer Scripts through E-mail / Whatsapp to their own respective colleges on the same day / date of examination within 1 hour after end of exam. University / College authorities will not be held responsible for wrong submission (at in proper address). Students are strongly advised not to submit multiple copies of the same answer script.*

——×——